0649CH08

अष्टमः पाठः

# सूक्तिस्तबकः

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ।।1।।

पुस्तके पठितः पाठः जीवने नैव साधितः।
किं भवेत् तेन पाठेन जीवने यो न सार्थकः ।।2।।

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति मानवाः।
तस्मात् प्रियं हि वक्तव्यं वचने का दरिद्रता ।।3।।

गच्छन् पिपीलको याति योजनानां शतान्यपि।
अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति ।।4।।

काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः।
वसन्तसमये प्राप्ते काकः काकः पिकः पिकः ।।5।।

© NCERT not to be republished







## शब्दार्थाः

| | | |
|---|---|---|
| उद्यमेन | – परिश्रम से | by hard work |
| मनोरथैः | – मन की इच्छा से | desire/only by desiring |
| सिंहः | – शेर | lion |
| मृगाः | – हिरण/पशु | deers/animals |
| दरिद्रता | – दीनता/कृपणता | poverty |
| प्रियवाक्यप्रदानेन | – प्रिय वचन बोलने से | by using sweet words |
| तुष्यन्ति | – सन्तुष्ट/प्रसन्न होते हैं | get satisfied |
| मानवाः | – मनुष्य | human beings |
| तस्मात् | – इसलिये | therefore |
| वक्तव्यम् | – बोलना चाहिए | should be spoken |
| वचने | – बोलने में | in speaking |
| साधितः | – उपयोग किया | used |
| भवेत् | – होगा/होना चाहिए | should be |

© NCERT not to be republished



| | | | |
|---|---|---|---|
| **सार्थकः** | – | अर्थपूर्ण/प्रयोजन युक्त | meaningful |
| **काकः** | – | कौआ | crow |
| **कृष्णः** | – | काला | black |
| **पिकः** | – | कोयल | cuckoo |
| **पिककाकयोः** | – | कोयल और कौए में | between cuckoo and crow |
| **प्राप्ते** | – | आने पर | after getting |
| **गच्छन्** | – | जाता हुआ | while going |
| **पिपीलकः** | – | नर चींटी | ant (he) |
| **याति** | – | जाता है | goes |
| **योजनानाम्** | – | 4 कोसों का (लगभग 12 कि.मी.) | a measure of distance equal to 12 kms. |
| **शतानि** | – | सौ | hundreds |
| **अगच्छन्** | – | न चलते हुए | without movement |
| **वैनतेयः** | – | गरुड़ | garuda |

© NCERT not to be republished





## अभ्यासः



**1. सर्वान् श्लोकान् सस्वरं गायत।**

**2. श्लोकांशान् योजयत–**

| क | ख |
|---|---|
| तस्मात् प्रियं हि वक्तव्यं | सर्वे तुष्यन्ति जन्तवः। |
| गच्छन् पिपीलको याति | जीवने यो न सार्थकः। |
| प्रियवाक्यप्रदानेन | को भेदः पिककाकयोः। |
| किं भवेत् तेन पाठेन | योजनानां शतान्यपि। |
| काकः कृष्णः पिकः कृष्णः | वचने का दरिद्रता। |

**3. प्रश्नानाम् उत्तराणि लिखत–**

(क) सर्वे जन्तवः केन तुष्यन्ति?

(ख) पिककाकयोः भेदः कदा भवति?

(ग) कः गच्छन् योजनानां शतान्यपि याति?

(घ) अस्माभिः किं वक्तव्यम्?

**4. उचितकथनानां समक्षम् 'आम्' अनुचितकथनानां समक्षं–'न' इति लिखत–**

(क) काकः कृष्णः न भवति। [ ]

(ख) अस्माभिः प्रियं वक्तव्यम्। [ ]

(ग) वसन्तसमये पिककाकयोः भेदः भवति। [ ]

(घ) वैनतेयः पशुः अस्ति। [ ]

(ङ) वचने दरिद्रता न कर्त्तव्या। [ ]



© NCERT not to be republished





**5. मञ्जूषातः समानार्थकानि पदानि चित्वा लिखत–**

| ग्रन्थे | कोकिलः | गरुडः | परिश्रमेण | कथने |
|---|---|---|---|---|

वचने ...............

वैनतेयः ...............

पुस्तके ...............

उद्यमेन ...............

पिकः ...............

**6. विलोमपदानि योजयत–**

| क | ख |
|---|---|
| सार्थकः | आगच्छति |
| कृष्णः | श्वेतः |
| अनुक्तम् | सुप्तस्य |
| गच्छति | उक्तम् |
| जागृतस्य | निरर्थकः |

© NCERT not to be republished

